**കണ്ണൂർ ജില്ലാപഞ്ചായത്ത് _ ഡയറ്റ് കണ്ണൂർ**

**മുകുളം സമഗ്രവിദ്യാഭ്യാസപദ്ധതി**

**എസ് എസ് എൽ സി മാതൃകാപരീക്ഷ -2021**

# संस्कृतम्

**സമയം _ഒന്നര മണിക്കൂർ** ആകെ മാർക്ക് 40

---

**निर्देशाः–** * २० निमेषाः समाश्वासकालाः। प्रश्नान् पठितुम् इच्छानुसारं चयितुम्, उत्तराणि क्रमीकर्तुं च अयं समयःउपयोक्तव्यः।

* प्रश्नान् निर्देशान् च सम्यक् अवगम्य एव उत्तराणि लिखत ।
* उत्तरलेखने मूल्याङ्काःकालः च परिगणनीयाः ।
* १–३१ प्रश्नेभ्यः परमतः ४० अङ्काः कल्पिताः।
* विवर्तनप्रश्नात् ऋते सर्वेषां प्रश्नानां उत्तरलेखने देवनागरीलिपिः उपयोक्तव्या।

---

## 1–8 प्रश्नानां प्रत्येकं एकैकः अङ्कः।

**अधोदत्तानां प्रश्नानाम् उत्तराणि कोष्ठकात् निर्धार्य लिखत।**

1. शङ्करदिग्विजयस्य कर्ता कः ?

   ( शङ्कराचार्यः ,माधवविद्यारण्यस्वामिः, कालिदासः )

2. त्वां मृत्यवे ददामि – कस्य वचनमिदम् – (नचिकेतसः ,वाजस्रवसः ,यमदेवस्य)

3. किं गणे न अन्तर्भवति ? ( आखण्डलः , वासवः, वृषभः)

4 लाभानां श्रेष्ठं किम् ? _ (आरोग्यम् ,दाक्ष्यम् , श्रुतम् )

5. सुखदुःखयोः कर्ता कः ? (आत्मा, शरीरम्,बुद्धिः )

6. 'अयि शुभे ! किमेवं रोदिषि ’? -कस्य वचनमिदम् (कृषकस्य, सुराधिपस्य,सुरभेः )

7. गीतारहस्यस्य कर्ता कः ?( महात्मा गान्धिः, बालगंगाधरतिलकः,डा.एस् राधाकृष्णः)

8. मधुसूक्तं कस्मिन् वेदे अन्तर्भवति ? -( यजुर्वेदे,ऋग्वेदे ,सामवेदे)

## 9-17- प्रश्नानां प्रत्येकं द्वौ अङ्कौ l

**9 उदाहरणानुसारम् एकं पदं लिखत -**

उदा. - सुराणाम् अधिपः - सुराधिप:

धनानाम् अधिपः - ................................

उदा.. धनेन हीनः - धनहीनः

ज्ञानेन हीनः -................................

**10. उदाहरणानुसारम् पदच्छेदं लिखत -**

उदा.. तुष्टिरुत्तमा - तुष्टिः + उत्तमा

कीर्त्तिरुत्तमा - ........... + ...............

उदा. तावनादृत्य – तौ + आनादृत्य

तावन्ते - ......... + ........

**11 सुभाषितं पठित्वा अधोदत्तेभ्यः उचितं आशयं चित्वा लिखत -**

शनैरर्थः शनैः पन्था

शनैः पर्वतमारुहेत् ।

शनैर्विद्या च धर्मश्च

व्यायामश्च शनैः शनैः ॥

क. व्यायामः मन्दमेव करणीयः ।

ख. स्वकर्मणः फलं स्वशरीरेणैव अनुभूयते ।

ग. व्यायामं अनुशीलयन्तः रोगरहिताः भवन्ति ।

**12 श्लोकं पठित्वा अधोदत्तेभ्यः उचितं आशयं चित्वा लिखत -**

विधिना खलु वञ्चिता वयं

वितरीतुं वटवे न शक्नुमः ।

अपि भैक्ष्यमकिञ्चनत्त्वतो

धिगिदं जन्म निरर्थकं गतम् ॥

क. शङ्करः ऐश्वर्यदेवतां मधुरवचनैः तुष्टाव ।

ख. अपरेषां कृते प्रयोजनरहितं जन्म निरर्थकं ।

ग. शङ्करः यथापूर्वम् उत्तमशास्त्राणि अपठत् ।

**13. श्लोकं पठित्वा गद्यक्रमं लिखत -**

परिश्रमो मिताहारो

भूगतावश्विनीसुतौ ।

तावनादृत्य नैवाहं

वैद्यमन्यं समाश्रये ॥

---------- मिताहारः ------- अश्विनीसुतौ । तौ -------- अहं अन्यं ------ न समाश्रये ।

**14. उदाहरणानुसारम् वाक्यं परिवर्तयत -**

उदा. - मातुः बहवः पुत्राः सन्ति । दीने पुत्रे कृपार्द्रहृदया अस्ति ।

यद्यपि मातुः बहवः पुत्राः सन्ति तथापि दीने पुत्रे कृपार्द्रहृदया अस्ति ।

क. जनाः चित्रशालां अगच्छन् । तत्र वैद्युतिः नासीत् ।

**15. उदाहरणानुसारम् वाक्यं परिवर्तयत -**

उदा.- कक्ष्यायां रमेशः नास्ति । अन्ये सर्वे सन्ति ।

कक्ष्यायां रमेशात् ऋते अन्ये सर्वे सन्ति I

क. उद्याने निम्बः नास्ति I अन्यत् सर्वमस्ति l

**16 उदाहरणानुसारम् पट्टिकां लिखत -**

(वदन् ,नुद्यमानः,गच्छन् ,कम्पमानः,पठन्, गम्यमानः )

| *शतृ* | *शानच्* |
|---|---|
| वदन् | नुद्यमानः |
| | |
| | |

**17 .कोष्ठकात् समुचितमुत्तरं चित्वा लिखत-**

कालिदासस्य द्वे महाकाव्ये चित्वा लिखत-

( रघुवंशम् ,अभिज्ञानशाकुन्तलम्, कुमारसम्भवम् , विक्रमोर्वशीयम् )

**<u>18 -21- प्रश्नानां प्रत्येकं त्रयः अङ्काः l</u>**

**18. <u>उदाहरणानुसारम् पट्टिकां लिखत-</u>**

( ऋक्, छन्दः, ईशं, शिक्षा,सामः,कठं )

| *वेदः* | *उपनिषदः* | *वेदाङ्गाः* |
|---|---|---|
| ऋक् | ईशम् | छन्दः |
| | | |

**19. वाक्यं पठित्वा क्त्वान्त-ल्यबन्त-तुमुन्नन्त पदानि विविच्य लिखत-**

विद्यालयं आगत्य व्यायामस्य महत्वं पठित्वा टिप्पणीं लिखितुम् अध्यापकः अवदत् l

**20 कोष्ठकात् समुचितमुत्तरं चित्वा पट्टिकां लिखत-**

(कदली, पूगः ,उदुम्बरः, इक्षुः, पनसः, आम्रः )

| वृक्षः | वनस्पतिः | ओषधिः |
|---|---|---|
| | | |
| | | |

**21 .कोष्ठकात् समानार्थकपदानि चित्वा लिखत -** (जननी, बलीवर्दः ,इन्द्रः )

| *पदम्* | *समानपदम्* |
|---|---|
| वासवः | |
| ऋषभः | |
| माता | |

**22 -29 प्रश्नानां प्रत्येकं चत्वारः अङ्काः l**

**22. सूचनानुसारं टिप्पणिं लिखत-**

सूचनाः- वृक्षायुर्वेदः - चतुर्विधम् - फलात्पूर्वं - वनस्पतिः -वीरुत् - आम्रजम्ब्वादयः l

**23 यथोचितं योजयत।**

क. ऊर्जप्रदायिनी - सुरभिः

ख. मधुसूक्तम् - शिवः

ग. गिरिशः - आमलकी

घ. कामधेनुः - ऋग्वेदः

**24 पट्टिकां लिखत-**

| लङ् | लट् | लोट् |
|---|---|---|
| अपठत् | पठति | ............................. |
| .......................... | वदति | वदतु |
| अनयत् | ............................ | नयतु |
| अकरोत् | करोति | ............................. |

**25 . गद्यांशं पठित्वा संभाषणं लिखत-**

केरलीयः प्रसिद्धः संगीतज्ञः आसीत् रविवर्मन् तम्पी। पश्चात् सः इरयिम्मन् तम्पी इति नाम्ना प्रसिद्धोभवत्। संस्कृतं, कैरली, आङ्गलादिषु भाषासु सः प्रसिद्धः। संस्कृते कैरल्यां च अनेन अनेकानि कीर्त्तनानि विरचितानि। अस्य "ओमनतिङ्कल् किटावो ...........................” इति गीतं प्रसिद्धं भवति।

छात्रः – इरयिम्मन् तम्पी महाशयस्य यथार्थ नाम किम् ?
अध्यापकः – ..................................................।
छात्रः – .......................................?
अध्यापकः – सः केरलदेशे जनिमलभत।
छात्रः – सः महाशयः कासु भाषासु प्रसिद्धः आसीत् ?
अध्यापकः – ........................................।
छात्रः – तस्य प्रसिद्धं गीतं किम् ?
अध्यापकः – ........................................।
छात्रः – धन्यवादः।

**26 . श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत-**

अमुना वचनेन तोषिता
कमला तद्भवनं समन्ततः।
कनकामलकैरपूरय-
ज्जनतायाः हृदयं च विस्मयैः॥

क. अस्मिन् श्लोके क्रियापदं किम् ?

ख. का तोषिता ?

ग. कस्याः हृदयं विस्मयैः अपूरयत् ?

घ. परितः इति पदस्य समानार्थकपदं श्लोकात् चित्वा लिखत -

**27. सूचनानुसारं कण्वमहर्षेः स्वभावं लिखत -**

अभिज्ञानशाकुन्तलम्...............तापसः..................लोकज्ञः............................

पितृस्नेहम्......................सदुपदेशः ।

**28 . सूचनाः उपयुज्य जीवनचरितं लिखत -**

| | | |
|---|---|---|
| नाम | - | एस्.के . पोट्टक्काट् |
| जन्म | - | १९१३ मार्च् १४,कोषिक्कोट् जिल्लायाम् |
| पितरौ | - | कुञ्ञिरामन् पोट्टक्काट् , कुट्टूसी च |
| प्रसिद्धिः | - | सञ्चारसाहित्यकारः, कविः |
| कृतयः | - | बालिद्वीप् , ओरु देशत्तिन्टे कथा |
| पुरस्कारः | - | ज्ञानपीठम्, केरल-केन्द्र साहित्य अक्कादमी पुरस्कारः |
| मरणम् | - | १९८२ ओगस्ट् ६ |

**29 खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत-**

पौराणिककालादारभ्य संस्कृते अनेके ग्रन्थाः रचिताः विराजन्ते । तथा आधुनिककालेपि बहवः केरलीयाः संस्कृतकाव्यरचनया प्रथिताः । पि सी देवस्य, तेन विरचितं क्रिस्तुभागवतं च तेषु अन्यतमं भवति । ३३ सर्गात्मके अस्मिन् महाकाव्ये जोसफस्य विवाहादारभ्य येशुदेवस्य स्वर्गारोहणपर्यन्तं चरितं वर्ण्यते । कृतिरियं १९८० तमे वर्षे केन्द्रीयसाहित्य अक्कादमी पुरस्कारेण समादृता ।

क क्रिस्तुभागवतस्य कर्ता कः?

ख. क्रिस्तुभागवते कति सर्गाः सन्ति ?

ग. क्रिस्तुभागवते किं वर्ण्यते ?

घ. **कृतिरियं** इत्यस्य पदच्छेदं लिखत ?

**30 -31 प्रश्नानां प्रत्येकं पञ्च अङ्काः -**

**30 प्रादेशिकभाषया विवर्तयत -**

मानवजीवने शुचित्वस्य प्रथमं स्थानं अस्ति । आरोग्यपरिपालनाय बाह्याभ्यन्तरशुचित्वं अत्यावश्यमेव । शरीरशुचित्वं परिसरशुचित्वं च बाह्यशुचित्वे अन्तर्भवतः। आन्तरिकशुचित्वे मनश्शुचित्वस्य अतीवप्राधान्यं वर्तते । मनश्शुचित्वं तु सुचिन्ताभिः समार्जनीयम् ।

**31 प्रादेशिकभाषया विवर्तयत -**

मलयालचलचित्रेषु संस्कृतगानानां अपि महत्तरं स्थानं अस्ति । तेषु प्रसिद्धमस्ति जानकी जाने इति संस्कृतगानम् । गानमिदं प्रसिद्धकविना यूसफली केच्चेरि महाशयेन विरचितमस्ति । मलयालगानमिव सर्वे जनाः संस्कृतगानमपि स्वीकुर्वन्ति । अतः अनेकानि संस्कृतगानानि इदानीं चलचित्रेषु प्रचलन्ति ।

*************************************************